**Introduction to Brahma Sutras by Shri Madhusudana Sarasvati :**

औपनिषदाः, तु भगवता नीलाचलनायकेन नारायणेनानुगृहीताः, निरतिशयानन्दबोधरूप आत्मा, एव, अनाद्यविद्यानिवृत्त्युपलक्षितो मोक्षः,इति,आचक्षते ।

अविद्यायाश्च सर्वदुःखोपादानत्वात् ,तन्निवृत्त्या,आत्यन्तिकदुःखनिवृत्तिरप्युपपद्यते । तस्य च स्वरूपे साधनानपेक्षत्वेऽपि व्यञ्जकतया महावाक्यकरणकः, तत्स्वरूपसाक्षात्कारः, एव प्रतिबन्धचतुष्टयरहितः, मोक्षसाधनम् , इत्युपचर्यते । प्रतिबन्धचतुष्टयं च विषयभोगवासना, प्रमाणगतासंभावना,प्रमेयगतासंभावना, विपरीतभावना च, इति ।

तत्र विषयासक्तेः श्रवणाङ्गभूताः शमदमादयो निवर्तकाः, प्रमाणगतासंभावनायाः श्रवणं निवर्तकम्, प्रमेयगतासंभावनाया मननं, विपरीतभावनायाश्च निदिध्यासनं निवर्तकम् , इति । अतः श्रवणादिसंपादनेनासंभावनादिप्रतिबन्धपरिक्षयाय चतुर्लक्षणी शारीरकमीमांसा समारम्भि भगवता बादरायणेन । मोक्षकामः, च अस्यामधिकारी,

'शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् ।'
(बृ.४।४।२३)

इत्यादिश्रुत्युक्तशमाद्युपबृंहितविचारविधिमूलके

'अथातो ब्रह्मजिज्ञासा' (ब्र.सू. १।१।१)

इति सूत्रे, अथशब्देन शमादिविशिष्टस्य मुमुक्षोरेव सूत्रणात् ।

तदयं निर्गलितार्थः - शमादिसहितेन मुमुक्षुणा गुरुमुपसृत्य मोक्षसाधनब्रह्मात्मैक्यसाक्षात्कारप्रतिबन्धासंभावनादिनिवृत्तये चतुर्लक्षणमीमांसया वेदान्तवाक्यविचारः प्रतिबन्धनिवृत्तिपर्यन्तम् , आवर्तनीयः इति ।

फलपर्यन्तब्रह्मविद्योद्देशेन विहितयज्ञाद्यनुष्ठानात्, नित्यानित्यविवेकप्रतिबन्धकश्चित्तदोषः प्रतिहन्यते । ततो नित्यानित्यविवेकेन, ऐहिकामुष्मिकवैतृष्ण्यप्रतिबन्धकश्चित्तदोषोऽपसार्यते । ततो विषयवैतृष्ण्येन शमदमादिप्रतिबन्धकश्चित्तदोषः ।

ततः शमदमादिभिर्विपरीतप्रवृत्तिहेतुकश्चित्तदोषः । ततोऽद्वितीयब्रह्मैक्यविषयवेदान्तशक्तितात्पर्यनिश्चयफलकेन श्रवणाख्यतर्केण क्रियार्थत्वादिभिर्हेत्वाभासैर्वा,अद्वितीयब्रह्मात्मैक्ये वेदान्तानां प्रामाण्यासंभवरूपश्चित्तदोषः । एवं वेदान्तानां

प्रामाण्यासंभावनाप्रचयहेतुभूतचित्तैकाग्र्यप्रतिबन्धकश्चित्तदोषः प्रमेयसंभावनाफलकेन मननाख्येन तर्केण । ततोऽन्यानुपरक्तब्रह्मात्मैक्य-विषयसंस्कारप्रचयेन हेतुज्ञानवृत्तिफलकेन प्रयत्नेन निदिध्यासनाख्येन, अनादिप्रवृत्तदेहात्मज्ञानजनितसंस्कारप्रचयः चित्तदोषोऽपसार्यते । ततोऽशेषदोषशून्ये स्वभावस्वच्छचित्तदर्पणे पूर्ववदेव वेदान्तवाक्येन जनिता, अखण्डवाक्यार्थविषया वृत्तिः सर्वदोषरहितत्वात् ,अप्रतिबद्धात् स्वतःप्रामाण्यादेव कृत्स्नम् अज्ञानतत्कार्यं निवर्तयति, ततः परं न शङ्का, न चोत्तरम् । तदुक्तम् -

'पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदयापि यथा ।
न फलाय भर्तुर्विषया भवति श्रुतिसंभवापि तु तथात्मनि धीः ॥
पुरुषापराधविगमे तु पुनः प्रतिबन्धकव्युदसनात्सफला ।
मणिमन्त्रयोरपगमे तु यथा सति पावकाद्भवति धूमलता ॥
पुरुषापराधनिवृत्तिफलः सकलो विचार इति वेदविदः ।
अनपेक्षतामनुपरुध्य गिरः फलवद्भवेत्प्रकरणं तदतः ॥
(सं.शा.१.१४)

तस्मात्, अद्वितीयब्रह्मात्मैक्यबोधस्य, अपरोक्षस्य स्वतः प्रमाणस्यापि बलवद्भिर्दोषैः परोक्षतामिव,अप्रामाण्यमिवापाद्य,अविद्यानिवर्तकत्वम्, अभिभूतम् । विचारेण तु दोषापगम एव केवलं क्रियते, न किञ्चिदाधीयते, तेन न स्वतःप्रमाण्यभङ्गप्रसङ्गः । तस्मात् , शमादिसंपन्नेन परिव्राजकेन मुमुक्षुणा गुरुमुपाश्रित्य चतुर्लक्षणमीमांसया विचार एवानुष्ठेयः फलपर्यन्तम्, इति विचारमेव विभज्य प्रदर्शयामः । तत्सिद्धम् , आत्मैव, अविद्यानिवृत्त्युपलक्षितो मोक्षः । तत्साधनं च वेदान्तवाक्यकरणकः, अन्यानुपरक्तब्रह्मात्मैक्यसाक्षात्कार एव श्रवणाद्यपनीतप्रतिबन्धः सन् , इति सर्वं समञ्जसम् ।

From Vedantakalpalatika

Four ~~topics~~ Types of तर्क employed in the four chapters of Brahma Sutra taken from सिद्धान्तबिन्दु of Shri Madhusudana Sarasvati :

तस्य चतुर्विधान्वयव्यतिरेकादितर्करूपत्वात् । दृग्दृश्यान्वयव्यतिरेकः साक्षिसाक्ष्यान्वयव्यतिरेकः, आगमापायितदवध्यन्वयव्यतिरेकः, दुःखिपरमप्रेमास्पदान्वय-व्यतिरेक इति समन्वयाध्यायाविरोधाध्यायसाधनाध्यायफलाध्यायाः । आनुवृत्तव्यावृत्तान्वयव्यतिरेकः पञ्चमः । एतच्च सर्वेषां वेदान्तानुकूलतर्काणां चतुर्लक्षणीमीमांसाप्रतिपादितानामुपलक्षणमित्यभियुक्ताः ।

------------